योऽनवक्षिप्तवचनः स भवेदनवब्रवः ॥३२॥
पराशरस्त्वृषौ हिंस्रे, दनः स्युर्दानचेतसः ।
विकर्तनक्षमा दन्ता यस्याः सा तु क्रिविर्दती ॥३३॥
संसारेच्छौ शरारुः स्याद्दन्तहीने करूलती ।
कीकटो नास्तिके, द्व्यर्थ इदंयुरिदमिच्छति ॥३४॥
एतद्वत्यप्यथो बुन्दवृन्दवृन्दारकाः शरे ।
भत्यो अत्यो गजेऽपि, किः
कर्तर्युल्बं शब्दो जरायुणि ॥
ऋबीसं तु पृथिव्यामित्याशुशुक्षणिवर्गकः ॥३५॥
अग्न्याद्या देवपत्न्यन्ता एकपञ्चाशता शतम् ।
देवतावाचिनः शब्दा विशिष्येह न वर्णिताः॥३६॥
इति भास्करराये‍ण काण्ड एकपदाभिधः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उक्तो जहाद्याशुशुक्षण्यादिवर्गद्वयान्वितः ॥३७॥
द्वाविंशत्यधिकानां शब्दानां षोडशशतानाम् ।
यास्कव्याख्यानुमतः सम्पूर्णो वैदिकः कोशः ॥३८॥

इत्याशुशुक्षण्यादिवर्गः ॥५॥

इति श्रीमद्भारत्युपाख्यगम्भीरराजदीक्षित-
सूरिपुत्रभास्करराय दीक्षिताग्निचिता
रचितोद्वितीय ऐकपदिककाण्डो
वैदिककोशश्च समाप्तः ॥

———

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मा ध वा नु क्र म णी

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

माधवानुक्रमणी

उपोद्घातः

लोकः पदं स्वरो वाक्यं समभिव्याहृतिः श्रुतिः ।
आर्षाण्यपि च शास्त्राणि पदार्थज्ञानहेतवः ।
व्युत्पत्तिस्तत्र लोकः स्यात्पारंपर्यसमागता ।
अग्निवाय्वादयः शब्दास्तत्र सर्वे निदर्शनम् ।
प्रकृति प्रत्ययव्यूहात्पदार्थपरिनिश्चयः ।
पदमित्युक्तमस्माभिर्घनो हन्ता हनो यथा ।
स्वरःप्रसिद्धो बहवस्तत्र चार्थाः प्रकल्पिताः ।
नामाख्यातविभागश्च स्वरादेवावगम्यते ।
ज्ञातार्थानि पदानि स्युरर्थानिर्णय हेतवः ।
१० वाक्यं तदुक्तमस्माभिरपामर्थं निदर्शनम् ।
अर्थो हि निम्नवाच्यत्र क्लृप्तोक्तेर्वाक्ययोगतः ।
पदयोरेव संयोगः समभिव्याहृतिर्मता ।
वृहन्तं चिद्वृहते[1]ऽत्र प्रसिद्धार्थं पदं बृहत् ।
पदेन तेन संयोगादमहान् स्याद्वहन्निति ।
द्रविणोदाः सनरस्य[2] सनरं स्थावरं भवेत् ।
द्रविणसस्तुरस्ये[3]ति जङ्गमो हि तुरो यतः ।
पलायमाना धावन्तो जिग्युभिः स्यात्समन्वयात् ।
यो धावद्भिर्हूयते[4]ऽत्र जिग्यवो जयिनो नराः ।
नू च पुरा च सदन[5] मद्याचिन्नू चित्तदपः[6] ।
२० पुराद्याभ्यां समायोगान्नूशब्दार्थो द्विधाकृतः ।
ममत्तु नः परिज्मे[7]ति परिज्मा परितो गतेः ।
वासाहत्वाद्वसर्हा च पृथिव्या वाचके इति ।

---

१. ऋ० १०।२८।९ २. ऋ० १।९६।८ ३. ऋ० १।१०१।६
४. ऋ० १।९६।७ ५. ऋ० ६।३०।३ ६. ऋ० १।१२२।३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्ष्णोत्रं[1] स्वधितिसंयोगात् संशिशीतेन चान्वयात् ।
तेजनार्था शिलेत्युक्तं बहवः सन्ति तादृशाः ।
त्र्यम्बकार्थस्तु श्रुत्युक्तस्त्रिभार्या स्याम्बिकेति सः ।
विश्वामित्रस्य शिष्यत्वादिन्द्र उक्तस्तु कौशिकः ।
निरुक्तव्याकरणयोः शब्दतत्त्वार्थ ईरितः ।
अपर्यवसितार्थेषु वाक्यसंयोगतो भवेत् ।
मन्त्रेष्वर्थं प्रवचनं तत्र चाहुर्निदर्शनम् ।
३० येना पावकचक्षसा[2] व्यषितेनेति पूर्यते ।
ते हि पुत्रासो अदितेः[3] पूर्वयर्चा समन्वितः ।
इमे चेतार[4] इत्यस्यां दुरोणे रावृधुस्ततः ॥
कदा त इन्द्र गिर्वणः[5] कदार्थे पर्यवस्यति ।
किंवृत्तेष्वपि चान्येषु स्थातव्यं प्रश्न एव नः ।
नेमादित्या अधस्यय[6] द्वाक्यद्वयमिदं भवेत् ।
नेमादित्यास्तदाप्नोतु यदद्यस्य भवेदिति ।
प्रयत्ते अग्ने सूरयो[7] जायेरन्निति गम्यते ।
यः समिधाय आहुती[8] स सर्वः स्वध्वरो भवेत् ।
वामस्य हि क्षमस्येति[9] स्मामेत्येतन्निहन्यते ।
४० तत ईशिष इत्येतदध्याहार्यं पदं भवेत् ।
आख्यातमाद्युदात्तं स्याद्यद्यद्यादिसमन्वितम् ।
अध्याहारेण तत्रैवं वाक्यभेदो भवेदिति ।
अर्वाञ्चं त्वा सुखे रथे[10] तिष्ठन्तमिति गम्यते ।
आ देवान् सोमपीतय[11] आङ्त्राक्षिपति क्रियाम् ।
हव्या सुश्चन्द्र वीतये[12] भवेयुरिति गम्यते ।
विशेषणाद्विशेष्यस्य कल्पनञ्च भवेत्तथा ।
रथो न यातः शिक्वभिः[13] शक्तैः स्याच्छिल्पिभि कृतः ।
भीमो न शृङ्गा[14] भीमेन प्रतीत ऋषभो भवेत् ।

---

१. ऋ० २।३९।७ २. ऋ० १।५०।६ ३. ऋ० ८।१८।५
४. ऋ० ७।६०।५ ५. ऋ० ८।१३।२२ ६. ऋ० ८।८३।५
७. ऋ० १।९७।४ ८. ८।१९।५ ९. ऋ० ६।७१।६
१०. ऋ० ३।४१।९ ११. ऋ० १।१४।६, ऋ० ६।१६।४४
१२. ऋ० १।७४।६ १३. ऋ० १।१४१।८ १४. ऋ० १।१४०।६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आख्यातान्युपमानेषु संगच्छेरन्नपि क्वचित् ।
५० तत्रोपमेयानुगुणमध्याहार्यं पदं भवेत् ।
स्रुचेव 'तमित्यत्र जुहवाम क्रियापदम् ।
उपमाने भवेन्मुख्यमन्यत्रोच्चारणं मतम् ।
उद्यन्नद्य वि नो भज[२] तदप्यत्र निदर्शनम् ।
दानं ह्यपेक्षितं तत्र न विभागस्तु रिक्थवत् ।
चतुरश्चिद्दमाना[३]त्कक्षीवन्तं य औशिजः[४] ।
रक्षा णो ब्रह्मणस्पते[५] त्वं महां इन्द्रयो ह[६] च ।
अध्याहार्यमेषु वाक्यं तथा ह्यर्थोऽन्वितो भवेत् ।
पादानामन्वयो मन्त्रे यथाविन्यासमेव नः ।
प्रायेण दृष्टः सर्वत्र दृश्यते त्वन्यया क्वचित् ।
६० गूर्तश्रवसं दर्माण[७] मेहीमस्य द्रवा पिब[८] ।
अगन्म महा नमसा[९] ज्येष्ठेन सोतरिन्द्राय[१०] ।
स्पृधां श्वेतं तरुतार[११] मृचो व्यवहितान्वयाः ।
ऋगर्थः प्रतिपादं च कश्चित्कश्चिदवान्तरः ।
तेषामवान्तरार्थानां सिद्धो मन्त्रार्थ इष्यते ।
अवान्तराणां वाक्यानां तथैव महतोऽपि च ।
सुप्तिङ्विभक्तयः सर्वा निदर्श्यन्ते यथोचिताः ।
तत्रैकत्वबहुत्वानां पाठभेदेन दर्शनम् ।
अवान्तरार्थभेदेन नैरुक्तानां न दुष्यति ।
प्रत्यक्षत्वपरोक्षत्वपाता[१]श्चैकेन संगताः ।
७० संगृह्यन्ते शाब्दिकैस्तदेतद्बाहुलकैरिति ।
ऋक्षुहर्षविषादाभ्यां मृदुभिः कठिनैरपि ।
तैस्तैः पदैः प्रतीयन्त इति केचन वह्वृचाः ।
तद्विशेषपरिज्ञानं वाक्यैस्तृच्कृत्स्वरेण च ।
आख्यात स्वरतश्चेति संगिरन्ते परे पुनः ।

---

१. ऋ० १।११०।६ २. ऋ० खि० १।५०।२ ३. ऋ० १।४१।९
४. ऋ० १।१८।१ ५. ऋ० १।१८।३ ६. ऋ० १।६३।१
७. ऋ० १।६१।५ ८. ऋ० ८।१७।११, ८।६४।१२
९. ऋ० ७।१२।१ १०. ऋ० ८।२।२३ ११. १।११९।१०

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आख्यातानुक्रमणिका पठितव्याग्रतो नृभिः ।
तया रूपाणि धातूनामर्थाश्च सुगमा इति ।
अनुक्रमणिका नाम्नामध्येया तदनन्तरम् ।
नासंस्कृता अधीयीरन्ननुक्रमणिके इमे ।
निपातानुक्रमणिका शीलनीया ततो द्विजैः ।
८० अर्था हि बहवस्तस्यां मया व्युत्पादिता इति ।
अनुक्रमणिका तुर्या गूढार्थपदगोचरा ।
तयैवाव्यक्तसंस्कारा निरुच्यन्ते क्रमादिति ।
आयुष्कामो न निर्ब्रूयान्नावैयाकरणाय च ।
न चाप्यनुपसन्नाय न चाशुश्रूषवे तथा ।
न कथंचन निर्ब्रूयादशुचिभ्यः प्रमादतः ।
आचार्ययुत्रः शुश्रूषुर्मानवे[2] दश दर्शिताः ।
निर्ब्रूयात्तेभ्यः एवेति सोऽयं शिष्टविनिर्णयः ।
मन्त्रार्थश्चावगन्तव्यो यथाशक्ति द्विजैरिति ।
वक्ष्यन्ते हेतवस्तत्र ग्राह्या सा बह्वृचैरतः ।
९० पञ्चम्यनुक्रमणिका विभक्त्यर्थप्रदर्शिनी ।
तया सुप्तिङ्विभक्त्यर्थवृत्तयो दर्शिता इति ॥
अनुक्रमणिका षष्ठी स्वरतोऽर्थस्य निर्णयः ।
प्रदर्शयति मन्त्रेषु ग्राह्या सा निपुणैर्नृभिः ।
सप्तम्यनुक्रमणिका शाकल्यमनुधावति ।
व्याख्यातैवं हि तेनेयं संहितापददर्शनात् ।
पदतस्तदियत्तायाः प्रकृतेः प्रत्ययस्य च ।
धक्षि धुक्षि प्रवादेषु स्वरूपस्य च निर्णयः ।
तथा रेफितविज्ञानमनार्षेणेतिना कृतम् ।
तथैवान्ये विशेषाश्च तेनानार्षेतिना कृतम् ।
१०० समस्तपदविज्ञानं क्रमाध्ययनो भवेत् ।
संहितायां समानायामडाटौ दर्शनं क्वचित् ।
क्वचिच्चादर्शनं चेति स च भेदोऽर्थकारितः ।
केचिद्विसर्जनीयान्ताः शाकल्येन प्रदर्शिताः ।
केचित्स्वरान्तास्तेनापि भूयानर्थस्य निर्णयः ।

---

१. नि० २।३ २. मनु० २।१०९

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनः पदानि नाधीते तेषामर्थः स एव चेत् ।
विभक्तिस्वरसाम्ये च तस्मिन्नेव क्रमे सति ।
पदोपादानहानाभ्यां वह्वाश्चर्यमदीदशत् ।
कृतव्याख्यैव तेनेयमृषिणा दाशतय्यभूत ।
समयानुक्रमणिका यत्नेन महता द्विजैः ।
११० बह्वृचैरवगन्तव्या तस्मात्प्राज्ञतमैरिति ।
ऋषिनामार्षविज्ञानाद्यामर्थविनिश्चयः ।
अनुक्रमणिका तस्मादार्षी ग्राह्याष्टमी द्विजैः ।
प्रतिपादमृचामर्थाः सन्ति केचिदवान्तराः ।
ऋगर्थःसमुदायः स्यात्तेषां बुध्या प्रकल्पितः ।
छन्दोऽनुक्रमणी तस्मात्ग्राह्या सूक्ष्मेक्षिकापरैः ।
हातव्यान्यतिरिक्तानि पदान्यर्थबुभुत्सुभिः ।
न्यूनानि चाध्याहार्याणि तच्च तत्रैव दर्शितम् ।
दशम्यनुक्रमणिका देवतानां प्रदर्शिनी ।
देवताज्ञानपूर्वा हि मन्त्रार्थेषु नृणां गतिः ।
१२० एकादशीतिहासानुक्रमणिका ततः ।
अज्ञातेष्वितिहासेषु नह्यर्थः प्रतिभाति नः ।
एताभिरेकादशभिर्यास्वर्थो नावभासते ।
द्वादश्यनुक्रमणिका तासामर्थे वदेदिति ।
अङ्गे किंचैकादशभिरर्था ये प्रतिपादिताः ।
व्यक्ता भवन्ति ते सर्वे मन्त्रार्थानां प्रदर्शनात् ।
तत्रैतदवगन्तव्यमृषयः संहितामिमाम् ।
नानाविधैरभिप्रायैर्दृष्ट्वा जग्मुर्दिवं प्रति ।
मन्त्रार्थतत्वविज्ञानमनृषीणां तथा सति ।
ताद्भाव्यानागमान्नृणां न भवन्त्यतपस्विनाम् ।
१३० शास्त्रैर्ऋगर्था ज्ञातव्या दोपरत्नसमाश्च ताः ।
यो जागारे[1]ति चार्हर्षिर्ग्राह्याण्यङ्गानि शाकलैः ।
नारायणः सुदुर्ज्ञेयो यज्ञाश्चामो तदात्मजाः ।
अथाप्यनुविधीयन्ते प्रीयतां भगवानिति ॥

ओं नमो नारायणाय

---

१. ऋ० ५।४४।१४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आख्यातानुक्रमणी

ओं नमो वासुदेवाय धातवो नामयोनयः ।
आचक्षते च वाक्यार्थं तिङ्विभक्तिसमन्विताः ।
यजुर्ब्राह्मणभाषासु यद्रूपमनुवर्तते ।
अन्वये व्यतिरेके च धात्वात्मास इति स्थितिः ।
भूयानृस्वक्ष्य रूपस्य लोपागमविकारजः ।
विपर्ययः, सन्ति चान्य आर्चिका एव धातवः ।
संप्रयोगात्पदैरन्यैरपि चाक्षरसाम्यतः ।
धात्वर्थरूपविज्ञानमेवं नामार्थकल्पनम् ।
पर्युदास्यो भवेद्धातुः सम्यञ्च यदि पश्यति ।
१० अर्थमन्यं तथा नाम पठितोऽपि स पाठतः ।
अल्पान्तरसमानार्थाः पठिताश्चेह धातवः ।
प्रातिस्विकार्थविज्ञानं वाक्यैरेव भवेदिति ।
धातवः स्तुति कर्माणः ईडे गायति नोनुमः ।
मनामहे नमस्यन्ति प्रशंसामो वचस्यते ।
अभिप्रमन्दे मदति प्रतिष्टोभति रेभति ।
गृणेऽनूषत शंसाति पनयन्ति विपन्यति ।
उच्यते भन्दते दीध्ये जराते जुरते स्तवै ।
जरते वन्दते गासि ऋज्यसे जोगुवे महै ।
स्तुषे स्तुवन्त्यावचति रिभ्यते वासयामसि ।
२० ररप्श ईट्टे रवति रिहन्त्यच्छां सुरस्वरन् ।
अर्चन्ति मंसै चक्रुव परिभूषति गूर्धय ।
अवेनदानृचुर्मन्ये चनिष्ठञ्च पनस्यते ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अशमिष्टोपब्रुवे च परिष्टोभन्तु शुम्भतु ।
मनामहे च महय सदामि च मखस्यते ।
अकृपन्ता जुर्यमुश्च पनिष्टाभिनवामहे ।
प्रमन्महेऽक्रमुरपि त्रिषष्ठिः स्युः स्तुतिक्रियाः ।
अर्चन्ति प्रतिभूषन्ति चर्किराम मनायति ।
अनमस्यन्नध्ययष्ट प्रयक्षन्त महीयते ।
विततस्रे वासयथः संमहेत समासते ।
३० सपर्येम सतेमानडकारीदाविवासति ।
अभिजुगुर्या पनयद्वल्गूयति विधेम च ।
शमाये यक्षि यजति ममृज्यन्ते च मंहयः ।
अहिंरे च व्यवस्यन्ति चर्कम्यनुमुदीमहि ।
अनुप्रयेजे वेनन्ति रराध किरते विधत् ।
ऋञ्जते परिरपति ददाशार्यन्ति चर्करत् ।
अभूषंश्च तथा वृत्रन्न कारिषमुपासते ।
धातवस्त्रैष्टुभास्तेऽमी पठिताः पूजनक्रियाः ।
ब्रूम स्वरन्ति वाशन्ति रारपीत्यवचेक्रदत् ।
स्तनयन्ति नोनुवन्त रराबीति वदामसि ।
४० आहुश्चष्टे वावदीति शिङ्क्ते क्रन्दसि रायसि ।
अस्वाष्टां हूमहे प्रोथ नानभत्यादिदेशति ।
नूनोन्नवीनोस्तनिहि वावशन्ताशिषामहि ।
अनुक्रोशन्ति शुम्भामि गायिषे च सनिष्वणम् ।
चोष्कूयसे गर्हसे च नदयन्ति जगन्ति च ।
आघोषथो वच्यते च मन्त्रयन्ते वनन्त च ।
गृणात्यूदिम राधाम मिमाति च मिमाय च ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पनायन्त च ऋच्यन्ते सपर्यति मुदीमहि ।
अवक्रन्दाचिक्रदच्च विवक्षि च मनामहे ।
अस्वनीदारुपाक्रुष्ट वव्रेऽर्चन्ति च तन्यति ।
५० आनवन्त कनिक्रन्ति शेपे वोचान्ति सर्जति ।
मर्मृज्यन्ते मन्वते च तथा गायसि शंससि ।
आगासिषुस्तथाघोषाद्राधाम च मियन्ति च ।
आदेदिशच्चाध्वनयत्कनिष्कं नन्यते तथा ।
अनोनुवुः श्रवय च रुवण्यश्च स्वराति च ।
अवीवशन्यूङ्खयन्तेऽराविषुश्च विवक्षच ।
एकाशीतिर्धातवः स्युरेते शब्दक्रिया इति ।
इच्छन्त्युशन्ति वनथ वावशुर्वष्टय कानिषत् ।
वशन्त्युश्मसि चाकन्धि कामयासे दृषण्यति ।
वरेयादाचके वीहि चाकनन्त चनस्यतम् ।
६० वाञ्छन्तु वृण्वते व्यन्तु वनोति स्पृहयन्ति च ।
वेनन्त्यच्छां श्छादयन्त श्वसिवेति वशाम च ।
ववष्टि विवसोरन्त ऊचिपे वेर्ववान च ।
रणयन्ते रणायन्त चाकनन्त वृणीमहे ।
हर्यत्यगृधदावव्ने स्मसीष इषयेम च ।
ऋतयन्तापरो वश्मि श्रवस्या दिषयन्त च ।
रराणा वाशयोपस्यादैभैरस्यं चरण्यति ।
चैश्छन्देषथुरिच्छार्था धातवः शाक्वरा इति ।
गच्छन्त्यहेम चरति जिहतेर्षन्त्यमंहत ।
अदीयमैये रिष्णासि गाः खादयत्यजूजुवत् ।
७० अभित्सरन्त्यर्थयासे गाथ गात च पप्तन ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभियन्त्वलर्ष्यार्यन्ति जर्भरीति जनासि च ।
अतस्यति रव्य अभूषद्दध्मावन्त्वारतागतम् ।
अरंहता वरीवर्ति जनिग्मं सूक्तिघातवः ।
आवपन्त्यारताजन्ति ग्मन्त जोषि जिगाति च ।
अतिक्रन्दन्त्याविवासेदवभून्नभिधेत च ।
आगनीगन्ति प्रतियन्नध्वनीत्परिभूष च ।
अदघावदलर्तीत आनध्यायत सिस्रते ।
अभ्यारता धसिषुश्च दध्मा अयति येतिरे ।
अहेषताफाणयच्च चक्रमन्ताजिरायते ।
८० अपीपतदपास्थुश्च जगायादिष ईरते ।
स्रसेम हासते हिन्वे श्चोतस्तीध्वं बिभत्सतः ।
जवते परिदीवन्ति प्रविविज्रे पदीष्ट च ।
प्रुषायन्ते निजिहाते पतयन्ति सिसर्ति च ।
तुन्दते गाहते द्रान्तु जगम्यामीषते द्रव ।
पेवेति विहि विष्यन्ति क्रतूयन्ते च दीयथः ।
ऋजन्त्वृण्वन्ति चस्कन्द धवध्वे पापतीति च ।
आजगन्विभिषुर्वातु सरयन्ते वियन्ति च ।
यतन्ते याति पीपीहि नसिन्तेन्वति गन्वहि ।
उदहासतेऽङ्खयन्ति पवन्ते च प्रवन्त च ।
९० निररंपत्यते सर्प प्लवते च भुरण्यति ।
वव्राज सस्रुः स्यन्दन्तां क्षोदन्ते च सिसर्षि च ।
स्कन्दन्ति वेर्वष्टिताति द्रासदेषे स्वरन्ति च ।
प्रतिस्मरेथां बुध्यन्त उदशेमापनीफणत् ।
ग्मन्तीयर्ति पतान्योषन्वेषि साध रिणाति च ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यवस्थान्वक्षुर्वावक्रे वेमीलयत वर्तते ।
इयक्षस्योहते दद्रुजुर्गुरच्च जिगीषसे ।
ध्रजत्येपति धन्वन्तु सरण्यानृज्यते तथा ।
ऋपन्त्यृणोति प्रक्रीडान्रंहयन्ते च निंसते ।
रासन्त्रथर्यन्ति तथा रीयते चेङ्खयावहै ॥

१०० च्यवन्त गन्त वृध्वं च स्वञ्चस्व च पतेम च ।
द्रुद्रवद्गमनार्थानामिति द्वासप्ततं शतम् ।
आशाते नक्षसे वेमि पपृच्छे नशते वृणक्ष ।
जोषीरतां विश्रयन्ते विद्यामाशुः प्रसर्पथ ।
अजीनः पस्पशे पारन्नामीमिक्षुर्मिमिक्षतात् ।
इये भुरन्ताविशन्तु नसतेषाण इन्वसि ।
च्यवसे निष्णतेयेथ यासिष्टं वातयामसि ।
वाडहं विव्यक्थ भक्षीय ययतं यय वक्षति ।
उपवेत्यभिप्रवन्त सचेथे ओचिषेऽश्नवत् ।
विव्यचद्गाहतेप्सन्त सचेमह्यूहुरोहते ।

११० परिष्वजामहे वेषि विवक्ष्येत ननेफति ।
आयेजे पत्यते चक्षदुपदीयन्ति सश्चति ।
इनक्षतश्च पुष्येमा तं सयोऽथ गनिर्मतम् ।
आपृक्षसेऽपानयच्च जनीमहि समीरत ।
आविवाय वदोन्द्रष्ट वहन्तु निनाय च ।
विवक्ष्य यासमभ्यारुराशुषे च नगायथः ।
न्यूहीते गातुयन्नश्य मृणोम्योहिष आवयः ।
दक्षदूनजवापुश्च विवेषार्तानडेरिरे ।
आततानोपविविशे विवासेयं यतेम चे ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिवक्षो ववक्षे च विविक्तो यातनापि च ।
१२० प्राप्ति प्रापणलाभार्था स्तत्तद्वाक्यानुगुण्यतः ।
नवतिः पठितास्तेऽमी धातवः पञ्च चाधिकाः ।
ददर्श विचयद्वचरव्यद्दृशेय भव चक्षि च ।
अवाख्यच्च विवक्षे च चाकशीत्यभिचक्ष च ।
अदृक्षत निचिक्युश्च ददृक्ष पश्यतीति च ।
चतुर्दशे ददृश्रे स्यात्त इमे दर्शनक्रियाः ।
अज्ञायि वित्तमम्नाते वेद चेतति चेत्यवेत् ।
वेत्थ वेदि विद ज्ञेया आविविद्रे विविद्रिरे ।
विद्र मंसीय विदथुरामन्येतां चिकित्रिरे ।
जानीथेमसि विन्दन्ते मनस्ये विद्मि दर्शथ ।
१३० बोधतं मंससे वित्तं मनिष्ये वेन्मनस्यसि ।
चिकित्सामो विदा विद्धि चिकितुश्चेतयत्यपि ।
चिकेत दमन्ताधीथ विविदे भुत्स्यभुत्स्महि ।
बोधया मनुताबुध्रं ज्ञानार्थास्त्रैष्टुभा इति ।
संशये विचिकित्सा स्याद्याचेद्विचितनेति च ।
अन्वेषणक्रियौ स्यातामन्वेति विचिनोति च ।
सिषक्ति निंसते वंस्व जुजोषथ सनोति च ।
मिम्यक्ष जोषयन्ते च सपन्ते वनुषन्त च ।
सिषाससि.....सचन्ते च भजामहे ।
च्यवस्य वन्वसि प्सन्त मृशन्तेऽश्रायि वेदिम ।
१४० इयक्षन्वक्षि वनत जुजुष्टन सनिष्यसि ।
वियोषद्भाग्वनवसे वनोतप ददृक्षत ।
अनक्षत वनो वंसि भनक्षि ववृषे वृत ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उवाचैकाधिकापङ्क्तिः सैषा भजनकर्मणाम् ।
याचते यामि भिक्षन्ते वीहीषुध्यति हूमहे ।
ईट्टे च प्रवहयन्ति कृपण्यत्यावृणीमहे ।
ईड आचक्र आयक्षि वव्रायामह ईमहे ।
अयासिषं चार्थयन्ति तथा रान्ते वनामहे ।
अवृण्यर्थयेथे रपत्यक्षते चायजामहे ।
षड्विंशतिर्धातवः स्युर्याञ्चार्थाः पठिता इति ।

१५० संपृच्छसे तथाच्छान्त शिक्षेम छादयन्ति च ।
उपच्छन्दनकर्माणः खदयन्तेति पञ्चमः ।
मृडाते तथा मृडय स्वदयोपदयाक्रियाः ।
अनुमम्नाते महेम महन्तां च तथारुव ।
प्रसवत्यभिगृणीहि मृष्यते च तथेन्वति ।
नवमश्चानुममिरे स्युस्तेऽनुज्ञाक्रिया इति ।
प्रयच्छसि प्रहियन्ते धात्वभ्यर्ष समूहसि ।
आ वर्जते ददन्यद्धि विवक्षे दाति पृञ्चति ।
उपमा हि शग्ध्यायंसदातक्षन्तु दशस्यति ।
देदिषे दयते जुह्वे वितिरामि वियन्तन ।

१६० विषाह्ययामि संशस्त युवस्व वनते शकः ।
यस्तं दीदिहि सुवसिदाश्मि नाश्नोति पुष्यसि ।
प्रदद्रिरे नियमते रिरिच्या नृमणस्यसे ।
ममहे ररते पृङ्क्त आयुवस्व दुवस्यथ ।
वनवद्दिदेष्वरदोददीरन्नासते भरात् ।
रासीय शक्तिं जिगृत नियुवैते उवोचिथ ।
व्रणते विधते वीहि दुःप्रयत्नसमन्वितम् ।
दधाति वल्शे क्षरसि सचेन्त च विवासि च ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचख्यथुर्विविष्टश्च वनाव प्रववाच च ।
मंहते वरिवस्यन्तु जिन्वतं यन्तु ताविदाः ।
१७० आवोऽहं रीरमायामि ववन्द स्कन्दति ख्यतम् ।
ददत्यविन्द शिक्षेय मामहे वङ्क्षिराभर ।
दिदिड्ढि यंसते वंस्व रिरिषे यंस्त दीधरः ।
सूदयच्च प्रहिणुता दिधिषन्तु नितोशसे ।
प्रहोषि चोष्कूयसे च यच्छद्याद्विभजाशकाः ।
करत्सनोतु हंसन्त तर्पयेथां विवासतः ।
आदर्द्ह्योर्विषेदासाद न्धूयते कृपणन्त च ।
वितारि चक्षि दिशति वियेमापि च येमथुः ।
संवेषिषो वययति च नस्याष्टादशं शतम् ।
अजहातन तत्याज परादेहि परासिचः ।
१८० प्रारिरेचित्परादेया जिहीते परिवर्जति ।
हीयेऽहासुरपारोधं परादा उत्सहं जहुः ।
चतुर्दशैते त्यागार्था गृभाय निमिमिक्षतुः ।
अभिव्ययस्व गृह्णन्ति गृहामहि मुषायति ।
आदद्वहे च गृहते क्रीणाति च जगृभिरे ।
दुर्गृभीय सआदामं जगृभ्यादसनत्तथा ।
आरभे च संरभन्ते षोडश ग्रहणक्रियाः ।
अविन्दथां विदो विन्धे स्पृहवाम सनेम च ।
असानिषं वेविदाम विन्धतेऽव्यन्नवेविषत् ।
अश्याम क्षेति विविदे सनुयाम विदंविवेः ।
१९० विद्याम विन्दते स्पार्ष प्रतिधीमह्यभक्त च ।
अभजन्तापीयति च भाजयत्यसनाम च ।
एकाधिकैषा गायत्री धातूनां लाभकर्मणाम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्ति जाम्भषदश्नाति व्यजसद्वन्त्वयोभसत् ।
ग्रसेत व्यश जक्षीयादत्स्यत्याक्ष बुभूजिरे ।
क्षन्वेविषद्गरन्नश्नन्नगिरज्जग्रसीत च ।
भुज्यते भोजतेऽशान वीहि वप्सति खादय ।
खदन्त्यशिद्भर्वति च जघास च जगारि च ।
आरिशन्तां तथाऽश्नीत भसथो घसदापयत् ।
बार्हता अत्तिकर्माणः पाहि पेयाः पिपीषति ।

२०० वा·····पर्याया·····ज्रा·····पयते तथा ।
.... ग्वृषायस्वैते स्युः पानार्था दश धातवः ।
अतीतृषाम ततृषुः स्यातां तृष्णाक्रियाविति ।
ममत्सिहर्षसे मत्स्व मादयेथे च मन्दसे ।
मदथस्तृम्पत····· रंह्यथः ।
उद्यत्वोपश्वासय च····मोतं जिन्व जिन्वथ ।
भुनोषि यक्षति तथा पिप्रीषति च तृष्णु... ।
तरीरमद्वावृपस्व रणिष्टन ममद्धि च ।
उन्ममन्दामन्दिषार्थां स्वदथो ररणस्तथा ।
सप्तविंशतिरूपाणि वर्तन्ते तृप्तिहर्षयोः ।

२१० रिहति रिहते रेडिह भवन्त्यास्वादनक्रियाः ।
दधते धाम दिधृत दिधिषामि च दीधरत् ।
उपस्तभायद्विव्ये च दिधिषन्ते च भारधुः ।
दधन्वे धायसे धैथे ववक्षे धत्त ओहसे ।
दधद्बभ्रे च दधनद्दधता धनया धति ।
दिधिषेय तथोह्याथे दयसे चाददन्त च ।
भरते च भ्रियाते च धनयन्ते भरन्त च ।
धेथे चाधत्थ चासघोरदर्धरधियेतिरे ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सधदित्यापि षट्त्रिंशद्धातवो धारणक्रियाः ।
आभजाभक्षदाधेयाः प्रतिधत्प्रतिदीधिम ।
२२० निदीधद्धिध्रयते हृद्क्तत्परिदक्रसि धारय ।
निवधिष्टं मिमाथां च निजह्युपसदेमधुः ।
आजघर्त्यासजाम्यश्रेत्प्रतिधुश्च निदीदिहि ।
आधाश्रेषाभाशिश्राय दयसे निजघन्थ च ।
विभरिश्रन्निमिम्युश्च निधेयासुन्नयामसि ।
आस्कभ्नाति न्यमृक्षाम श्रीणेषे दध यच्छताम् ।
दिधृतं च विस्पृशश्च मयन्ते धीयते धिथा ।
नियच्छता श्रियंस्तद्वद्धयुरुर्यत उच्यते ।
एते निधनकर्माणो भवेयुस्त्रैष्टुभा इति ।
वृद्धिवर्धनकर्माणो ववृधे प्रतियेतन ।
२३० हिनोत्युधाथे पीपाय ररप्शेय समानृधे ।
जरते वयते वर्धाञ्छुश्रुयात कृणोषि च ।
विवेर्जिन्वे संजरेत हर्षते च वृषायते ।
दयते तिल्विलायध्वं परिदेहच्च धुक्षतम् ।
प्रतारिषच्च पुष्यन्ति रेदयाति प्रशर्धयत् ।
मेद्यन्तु मेदतान्यूजै तूतोत्तूतावशूशुवत् ।
इन्धतेश..... द्धत्तस्तवेतापायि पिन्वते ।
प्रातन्तं ग्राम वर्धन्ति पिबेम वितिरन्ति च ।
पीपिह्यृणधदिन्वन्ति दक्षते पीप्यतां तथा ।
अवीवृधच्च नसते पीपयच्च हि तुन्दते ।
२४० इरधन्तोत्तरै धत्ते व्याश्वेदाप्यायसे तथा ।
अविव्यतमिरज्यन्त द्वचूना षष्टिर्भवन्त्यमी ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवेम स्याम विद्याम क्षयत्येध्येधतेऽसति ।
आस्सिध्यति जनिष्ठाः सन् भुवानि परिभूष च ।
आसुश्चतुर्दशास्त्यर्था जजान च ससूव च ।
विममेन्निररिणीत जज्ञे जज्ञुरपिंशत ।
सूतः सूदत तेऽमी स्युर्नव व्युत्पादनक्रियाः ।
प्रदधन्युरस्तभाये दृह्यादर्दृहि धारयेः ।
चस्कम्न ददृहेऽरम्णा वीडयस्व रिरीहि च ।
आमिमिक्षु व्रीडयासि स्थेयामास्थादतिष्ठिपः ।

२५० अर्दृहदपि दृंहेथे तस्तम्भारमयस्तथा ।
द्व्यूना विंशतिरित्येषां स्थितिस्थापनकर्मणाम् ।
अपेजते सूदयन्ते समीङ्खयति चोदयात् ।
जङ्घनानि संजयत न्यानजे पातयामसि ।
विवेरिष्यति तुञ्जेते निरिणीते सिसर्ति च ।
इषण्यतीष्ये सृजति वहेथे अजतीरते ।
विवातीयर्ति यवय वाजयामस्तुरण्यति ।
ऋञ्जते स्य····· तुञ्जन्ति हिनोतीनुजनासि चे ।
ऋण्वतीष्णाति सुवसि नुदेथामभिवर्तय ।
उह्यते च प्रवहत चोदनापिष ऊहसे ।

२६० अचुच्यवुः पत्यसे च निराविध्यत्समस्यत ।
प्रवहत चोदवायच्च प्रविवाय समिन्वतु ।
प्रसस्राते निस्सृजन्त जह्रूरन्नेषवे
निर्जनर्ध ····· नभरे रवताहति ।
अनयन्यातयासे च समप्यग्नि शश··वन् ।
अभियुध्य यातय च न्यवृणत्तु जरन्धय ।
एरन् व्यसन् प्राद ·····श्च ततस्रे च समेयथुः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

युयोधि ध्वंसय प्राष्ठान विवेरिषणत्तुदन् ।
ररीध्यमानद्विषमन्नविन्नो विवयन्ति च ।
एनोत्क्षिपच्यवन्ते च वर्तयापावपस्तथा ।

२७० उदीङ्खय वृषायच्च संधूनुहि रिरेव च ।
क्षेपयच्च सुषूदश्च रत्थ·····उपससृज्महे ।
विदिद्युतो द्रवयति प्रहेषे प्रतिचक्षि च ।
असृग्रमभ्यच्चरच पुनीषेह्यन्धुनोत्ति च ।
धमित्यपिन्वनुदया नृण चावसि यन्त च ।
एरज्यत द्रवयथ प्रादिभ्येरयदारुज ।
आविवासे तथा वंहो विवायावेपयोऽजनः ।
शतं सप्तदशश्चेऽमो धातवः प्रेरणक्रियाः ।
वे.... यते वेपयन्ति धुनयन्तामनार्तिषुः ।
ईङ्घयन्ति दोधवीति विपयन्ति वि.... र्यति ।

२८० एजथ व्यथते धूधोज्जिहाते दुधुवीत च ।
विधाव ····· ··· ··· ··· ··· ··· कोपय ।
अविजे चाभ्यसेतां च हेतसद्विविजस्तथा ।
विवेज्यते प्रुष्णते च काकुभास्तपनक्रियाः ।
त्रसन्ति भेम बिभय श्नथयन्त बिभीतन ।
बिभेत्यभैष्ट भयतोऽभ्यसेतां भीक्रिया नव ।
युध्म योत्सि योधयाश्च युयुधाते पृतन्यति ।
पञ्चंते युद्धकर्माण इन्वतो रुणधामहै ।
वृण्वते वारयन्ते च सिषेधापि च रोषति ।
षण्निवारणकर्माणो युवस्वाश्रे युजेव्ययः ।

२९० युनक्तायुज्य युङ्क्षातां नियुवैते अयुङ्क्त च ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपयुज्महे च दशमस्त एते योजनक्रियाः ।
अवावरीद्विहूणाति निषेध नियमन्निति ।
वराते निःशशा वव्रुः सप्त स्युर्वारणक्रियाः ।
अभिष्यात्प्रासि वनवदभितिष्ठ निरोधति ।
अवक्रमुः प्रसक्षच्च शापिद्याभ्यासनक्रमीः ।
वन्वन्त्वभिक्रंसते च सासहत्प्रभनक्ति च ।
सह्युः प्रसाक्षते साह्व पसामाभिक्षमेत च ।
अभितिष्टेमतितिरुः साक्षन्सादादिदेशति
अभिभूरभितस्थेन चासाक्षिन्यर्पयन्तथा ।
३०० अभ्यौहिष्टाभ्यश्नवाम धृष्णुह्यभिवभूव ह ।
आदधर्षि च दर्धर्षि तथाभिततनाम च ।
परिमृश्नन्त्यभ्यसच्च पङ्क्तिद्वचूंनाभिभूक्रियाः ।
तवाहिंसन्ति विध्यन्ति प्रमृणीहि श्नथिष्टन ।
वयन्ति तोशसे मन्ति स्रेहयन्निरिणाति च ।
दभ्नुवन्ति खिदन्व्यन्ति स्पृणुहि स्परतेदन ।
पपिषेध जयध्वेग्ध जिनन्तौब्जो स्फुरत्पृणत् ।
मर्द्धीशर्धद्विवधिष्व परियासि रिपण्यसि ।
ऋधायत चातयते दर्दरीति च दर्षसि ।
आर्द्स्ततस्रे रोषन्ति प्रतिषीयन्ति चिक्षिपः ।
३१० पृणाति तप्यते शारि ग्लपयन्ति चिकीर्षति ।
कृण्वते न्यृञ्जसे देभुरधूर्षत च सूदय ।
अविवेषीर्वनुष्याच्च भनत्ति च भिनत्ति च ।
निजूर्वादभिदासच्च मिनात्यभ्यातपन्ति हन् ।
रुरोज तुज्यते शास इरस्यत्यवधूनुषे ।
स्फुरन्त मत्त तपते विहरन्ते युयोपिम ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नियात... वनुष्यन्ति क्षिणन्ति च मिमाय च ।
हंस्योतिरं कूलयातो नितासं जघनन्तथा ।
उज्जिघ्रन्ते सेधत च दधर्षन्ति जरन्त च ।
दर्षि दित्सति मर्धन्ति बाधते च जुनन्ति च ।
३२० अतृणद्ग्रेषते घ्नन्ति निशिशीतं च दद्वयहि ।
अवक्रमुश्च जुहुरो निपृणक्ति पृतन्ति च ।
अवतातिरस्कभायच्च रेषयन्ति स्तृणोति च ।
ततर्दश्चाभिदुद्रोह मर्चयन्ति मथायति ।
रिरिषीष्ट संमिमीहि भीणन्ति वनुयाम च ।
अर्दयो जम्भय.....जितामिनादुच्छुनायसे ।
आचखाद श्नाथिहि च बर्हयातमदस्फुरत् ।
विगाह्यश्नाच्चेदयते दषीष्टास्तुर्यस्तु च ।
अवनोश्च कर्शयन्ती.....वनवं समौ ।
संपिपेष शिश्रथश्च वितिरातिस्तराम च ।
३३० नेम ... ...रीरक्षत्यभियासिषत् ।
अवक्णोमि व्यथय च प्राक्षिणाश्चं नितृम्पसि ।
अदूदुषन्नितिरवगवतारिश्च तूर्वसि ।
अध्यायत्यशृणो रक्षा विशस्त च निवासते ।
पञ्चाशं शतमेते स्युर्हिसाकर्मण उद्धृताः ।
छिन्ध्यपिंशश्छृणीतं च परावक् छेद्म वृश्चसि ।
विविक्तं विरिणा अस्तर्दयन्ते वर्तयन्तथा ।
भङ्घिस्तनोति वचते पपन्ति च धनन्ति च ।
वृणक्ति वृञ्ज आवृक्षि तितक्ष दात्यराविषत् ।
चत्तोत्कृन्नत्यकृत च प्रमोमि श्ववनन्वति ।
३४० अवृष्टश्चौर्णिहा स्तेऽमी धातवश्छेदनक्रियाः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जिगेथ जेष्यजैष्येति जयार्थास्त्रयः ईरिताः ।
जयन्त्यजूर्यं जूर्यन्ति त्रयः स्युर्जरणक्रियाः ।
परिव्ययोर्णु ते धुक्षच्छदयन्ति जुगुक्षतः ।
गूहथः प्रस्तृणाते च वहते विहुते गुहः ।
दश गूहनकर्माणस्तुतुर्याचूर्यतूर्व ..... ।
तरुषन्त तर्तरीति तरते पर्षि तारिषत् ।
स्पर्तञ्चरन्विप्रतित तूर्वतं निष्पिपर्तनम् ।
अतारिष्ट च तु...र्यात्पारया पीपरस्तथा ।
तत्तूर्यन्ते पिपर्त्यस्पर्विशतिस्तरणक्रियाः ।

३५० रक्षावीज्जुगुपुः पान्ति जिन्वाविष्टत धन्विरे ।
आविढ्यवस्पृधि त्राध्वं विपर्षि दयतेऽवित ।
उरुष्यतं पादविष्टस्त्रासीथामविषो दुहे ।
विवायाव्याश्च विभृत गोपायन्त्यव धातवः ।
गायत्रा रक्षणार्थाः स्युर्दहामि दयते तप ।
धक्ष्यधा घोषतदुष्ट्रन् समवृत्त च दूर्वच ।
विधहि स्वाद धत्तं च दानार्था द्वादश स्मृताः ।
भ्राजन्त आशुशुघ्य भ्राद्घ्ये दीदिहि दीदयत् ।
तपत्यभ्राजि शोचस्व दविद्युत शुशोभते ।
व्यश्वैदशोच्यदेदिष्ट दीपयश्च रिणक्षि च ।

३६० अबोध्य-द्यौ-द्विरुरुचुः शुम्भयन्ताघृणे भसत् ।
अशिश्वितद्दीदयश्च तित्विषे रारवीहि च ।
अशिश्वितो विदीधेच्च रुचयन्त प्रचक्षय ।
समिन्धतोऽतीतपे च दविद्योजासि राजसि ।
उद्बुध्यस्व प्रुषायन्ते संदिदीप स्मयन्ति च ।
शुभयन्ते दविद्योच्च तथा दीदाय भान्ति राः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अब्रुध्रं च रुरुच्याश्च दीप्त्यर्थं द्वचूनजागताः ।
परिष्कृण्वन्ति शुम्भन्ति निष्कृथा शूशुभन्नपि ।
निममृजे भन्दते च श्रीणन्ति समकारि च ।
इष्कृ···ध्वमज्यते दश संस्करणक्रियाः ।

३७० संजग्मुरुपयुज्यन्ते ससवन्त समुच्यसि ।
सचन्तां समवर्तन्त संवृणक्तु ववन्म च ।
संगृणीते समानंश ····· श्वेविष्याच्च संगृणम् ।
संमदन्ति समच्यन्त पृक्तं संनेषि संहरम् ।
नडियासे संचरन्ति समवर्तय संसृजत् ।
सबर्हय संतुतनेः समयन्त युवन्त च ।
संरोचते संहनन्त संयजन्ते समग्मत ।
समगस्मह्यायुवते संमिमिक्ष युयूषतः ।
संपृच्यन्तेऽभियोधीश्च समरैगापृचीमहि ।
अभ्यजाव चाभ्यम····· संरभेमहि संवयि ।

३८० संजिघ्नन्ते संविशन्तु संमिमिक्षु समूहति ।
संवावशन्त तत्सार तथासक्त ····· ।
समां कृणुध्वमथ संनसामह इत्यपि ।
समजग्मिरन् समीयुः संगच्छध्वं च धातवः ।
द्वचूना षष्टिः संगतार्थास्तद्विशेषास्तु वाक्यतः ।
समैरयं संदधते संरिरीथ समन्वित ।
विव्ये च प्रत्यैरयतं समरन्त च सप्त ते ।
संधानार्था ·····हे मृष्यते साहसन् मृडन् ।
चत्वारो मर्षणार्थाः स्युः प्रतिमुञ्चते आखयत ।
प्रत्ययुग्ध्वं च ब्रध्नते·····स्पाशयस्व च ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३९० सिनोशे .....स्पृष्ट समयन्ते च येमथुः ।
अप .....षन् समनाह च येयिम ।
अश्यर्धातामासिषाय ते सप्तदश बन्धने ।
आसजामि संभरन्ते निवेवेति च पिंशते ।
परिष्वजन्त्यश्लिषच्च मिम्यक्ष च समानूचे ।
रिपुनवन्ताञ्जते च त्रैष्टुभाः श्लेषण-क्रियाः ।
शीर्यते ब्रुन्द श्रुवरै रछ्रथर्यति .....।
सुकर्षो .....विश्रथाय नव शैथिल्य-वाचकाः ।
उपबबृह्यपार्धां च तृतीयश्चाभ्यधामिति ।
वाहूपधानकर्माणः स्त्रीणां स्युः पुरुषं प्रति ।

४०० क्षरत्पवन्ते श्चोतन्ति दुहीयश्च प्रसिव्रते ।
अस्यानसिष्यादुदग्र पवस्वाभ्यह्न दोहते ।
अक्षाः प्रधन्व सुस्रोच्च सुष्वयन्ते स्रवन्ति च ।
परिप्रस्यन्दते विव्ये भक्षीमहि च धुक्ष्व च ।
आवच्च स्वदोक् प्रुषायत् क्षरणे विंशतिस्त्रिभिः ।
सिञ्चामि परिषिच्यन्ते दुहे मेहत आज्यते ।
अभिप्रष्णत उक्षन्ते तथा क्षरत पिन्वते ।
मिमिक्षत पपियतो जिव्य मेहयन् ।
प्रौक्षन्नौक्षीस्तृषायन्ते श्च्योतान्ति व्यौनदासि च ।
उपस्णीतं विष्यन्ति द्वाविंशत्सेचन क्रियाः ।

४१० जीव जीवन्ति जीवेम शूशवाम दधन्विरे ।
प्राणित्याधारयन्तापि प्राणीदानीदिमे नव ।
चकार कृण्महे चक्रन् करिक्रत्करते कृषे ।
कर्त्ता कर्माक्रि तन्वन्ति कृतं चक्रानशे नशत् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संमिमीहि प्रत्यधायि रिरिच्याच्चिच्युतैतते ।
पर्यचामि प्रमिमय शिक्षते तायते तथा ।
अवैददत्त तन्यन्ति ततक्षुरुपमासि च ।
साधाव्यये·····ममिरे मिमीतां च विवेष च ।
अरैक् चरामसि तथा कृणुतः कृपतेति च ।
··· ··· ··· ··· ··· विवृत च क्रिया ।

४२० अविवेष त्रैष्टुभाः स्युर्धातवः करणक्रियाः ।
चक्रमन्त चक्रमाथे क्रमतेऽति मनामहे ।
विचक्रमे क्रंसते च षडेते क्रमणक्रियाः ।
आरोहसे चारुहे च तस्थावस्था दधीरि च ।
पञ्चारोहणकर्माण उज्जिहीत उदर्पय ।
उच्छ्रियस्व संजिहीते उदारदुदुयर्ति च ।
उच्चरात उन्मृशस्व तेऽष्टा उद्गमनक्रियाः ।
सर्वे च गतिकर्माण उत्पूर्वा उद्गमक्रियाः ।
उदेत्युदश्रेदुत्तिष्ठदथोदार्त्त उदारत ।
उदपप्तन्नुदोर्ध्वेति सप्त तत्र निदर्शनम् ।

४३० उज्जिघ्नन्ते निर्जभार निरतष्ट ववर्ह च ।
विविदश्र प्रवृहथ ··· ··· ··· ··· ।
उद् ··· ··· व्यतिरच्चेति तेऽमी विवरणक्रियाः ।
स्तृणाति तिस्तिरेऽस्तारि विपयन्ति प्रवावृजे ।
वृज्यते स्तरणार्थाः षट् जुहोति जुहुरे पुनन् ।
जिघर्मि यक्षसि तथा जुहुते होमधातवः ।
समजासि जजस्तं च जहीति क्षेपणक्रियाः ।
क्रीडन्ति दीध्यदादीध्ये त्रयः स्युर्देवनक्रियाः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दविषाणि तथा तन्द्रक् स्नेधतालस्यवाचिनः ।
अतियेषमत्यक्रमीत्क्रमिष्टमिहि च द्रव ।
४४० पञ्चातिक्रमणार्थाः स्यु ..... ते हासयन्ति च ।
हासार्थौ नेषदाशन्धि स्यातां प्रणयनक्रियौ ।
भरन्नाहाति वाहार्थावधुक्षद्गूहतामिति ।
धातू संवरणार्थीयाव स्पृध्रन् पस्पधे तथा ।
परामृशोदमृक्षन्त पस्पशंच्च स्पृशन्ति च ।
मृजेरवस्पृशं च ते गायत्रा स्पर्शनक्रियाः ।
ऊह्यतिस्थेय कर्मा स्याद्बीडयस्व तथापरः ।
सस्तु सिष्वं निषङ्ग ... ... शेषं निष्वापयत्तथा ।
ससन्त्व सस्तनेत्येतें स्वापार्थाः सप्त कीर्तिताः ।
अपह्नवे मुषायन्ति मोषथा मोषथेति च ।
४५० अमुष्णाः स्तेयकर्माणः शकेमाशक्नुवन्निति ।
शेके त्रिःशक्तिकर्माण उद्बुध्यध्वमभुत्स्महि ।
बोधामसि च जागार धातवो बोधनक्रियाः ।
अध्येसि परिममृशुरधीमह्यधिगातन ।
चत्वारः स्मरणार्थास्ते हर्षते जर्भुरीति च ।
जृम्भणार्थौ पचत्पक्षद्भृज्जति च ममत्तन ।
श्रीणन्ति च पचन्तीति षडमी पचनक्रियाः ।
प्रचिकित्साधिब्रवीतु स्याताम्धिवचःक्रियौ ।
परिदेहि परिदत्तादित्येतौ क्षेपणक्रियौ ।
तथा परिददच्चैव विरेचि प्ररिरेच च ।
४६० अत्यस्तु प्ररिरिक्थाथ प्ररिरिक्ते च पञ्चमः ।
एतेऽतिरेककर्माणश्चुक्रुधामाभ्यमीषि च ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृणीषे च हृणीथां च जिहीडापि च रोषति ।
क्रीणन्ति सप्तक्रोधार्थाः खुदथर्णोस्तस्तथापरः ।
अपिवृञ्जन्ति त इमे त्रयः प्रक्षेपणक्रियाः ।
अपिस्मसीत्यप्ययात्थ आररामबलंवले ।
खिदत्याच्छेदनार्थाः स्युर्वस्ते वस्त्रन् समव्ययत् ।
परिव्यत च संविव्ये स्परदौहदगूहथाः ।
वसतेऽभिधित्सते च वसाते च ववर्त च ।
द्वादशाच्छादनार्था स्युर्दर्दभ ... ... ।
४७० भरणार्थौ परिख्यत्स्यात्परिख्यंश्च निषेधने ।
ततान विव्यक् ततनदनष्टां विव्यचन्त च ।
विधावभुवि ..... सप्त व्याप्तवाचक्रिया इति ।
ततनन्ता प्रथेतां च व्यमिमीत वितत्निरे ।
आतन्वते चाततने व्यतिरस्तत्निषे तनत् ।
नव विस्तारकर्माणो मिमेथा क्रोशनक्रियः ।
अभ्यमन्त रोगकर्मा विरेथे स्यान्निवारणे ।
आजुहोत हुवे ह्वन्त ह्वयन्ते जुहुरे तथा ।
आह्वानार्था अमी पञ्च निविशन्ते महीयते ।
निषीदध्वमासते च सीदा सत्सि निषीदत ।
४८० ववृतुं नीमिमृत्नुश्च शिश्रीत निषसत्थ च ।
क्षयन्त्यादच्छदयते दश पञ्चापि चासते ।
अञ्जन्ति व्युद्यते ऽनज्याद्व्यन्धीति क्लेदनक्रियाः ।
विनाशने विमृष्टा स्याद्ध्येत्यध्ययन क्रियः ।
शिशात्यपि च नेनिक्ते शिशीते निश्यतीत्यमी ।
चत्वारस्तैक्ष्ण्यकर्माणो नमन्ते नानमीति च ।
ववन्दिरे येमिरे च निनंसै नानमन्त च ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नम्नते नमनार्थाः स्युः प्रणेषदवहन्नृतुः ।
परावह तथा शाधि पञ्च प्रणयनक्रियाः ।
खनाम्यतृणदित्येतौ भवेतां खननक्रियौ ।
४९० नियच्छायादनमयो येमतुर्यमनक्रियाः ।
उपक्षेति क्षयः क्षेषदाक्षिकेतदशायताः ।
शके यक्षितो धिक्षित च निविश्रन्निषसत्थ च ।
शेप ऊषतुरित्येते निवासे द्वादश स्मृताः ।
अविविक्तः संविविक्तो न्वि च पृथ्व्याद्वियन्ति च ।
विवर्तेते च यतथो वियौरवदिषीय चे ।
योषिद्वियोथाः परिगा विभराश्चातयस्त्र च ।
योधि योषति च तथा यवयस्यपि षोडशः ।
पृथक्करणकर्माणः प्रासि पूर्धि पिपिन्वथुः ।
पृणक्त्यापृण पर्षच्च सिञ्च मित्रति विव्यथुः ।
५०० निरप्श्रतेऽपिप्रत च पृणेथामापृणत्तथा ।
दुहन्ति पप्रथुः सिञ्च पूरयन्तु पिपर्ति च ।
उत्पुपूर्या मन्दयाच्च विशति पूरणक्रियाः ।
आपि ..... हर्षयन्ति पिपर्ष्यच्च त ..... तर्पयः ।
प्रीणीत जिन्व मृडत मन्दिषीमहि धातवः ।
रारंधयति वैराजा भवन्ति प्रीणनक्रियाः ।
अक्षोभयत्प्राक्षिणाश्च पिपीडे संपिणक् तथा ।
चत्वारः प्रेषणार्थाः स्युः पतत्पप्तुशु चोपतत् ।
पाद्यपानूनुथाः पप्तन् पञ्च स्युः पतनक्रियाः ।
विरोह विरुहेमेति वर्तते द्वेऽपि रोहणे ।
५१० प्रचक्षयाविः सन्तीति व्यञ्जतश्च प्रकाशने ।
प्रतिमिमीते ममतुर्ममाते चाते चामि मिमीत च ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विममते पञ्चमश्च परिच्छेदनवाचकाः ।
श्रुवन्तु श्रुधि शृण्वन्तु त्रयोऽमी श्रवणक्रियाः ।
पुनात्यव्यत शुन्धन्ति पुनीतन पुनन्तु च ।
पवनार्था इमे पञ्च शुन्धयन्तु मृजन्तु च ।
आधावत च संमार्ज्मि ममृर्ज्म च तथा वुपोत् ।
षडमी शोधनार्थाः स्युरथ राधति रीरधः ।
साधते साधनार्था स्युरशमिष्ठाः शमक्रियः ।
शुष्यति स्रेधति तथा क्षीयन्तेऽपि च तन्दते ।
५२० चम्नच्छाम्यति पायन्ति दस्यत्यपि च शश्रमुः ।
नव शोषण कर्माण ऊषुरौच्छद्विषाय च ।
उवासावासयन् पञ्च व्युष्टिकर्माण ईरिताः ।
समव्यद्वेष्टनार्थः स्याद्विभागे प्रतिवीहि च ।
मर्षिष्ठा प्रममर्षेति धातू विस्मरणक्रियौ ।
श्रीणन्त्यशिश्रियुश्चैव तथा श्रीणीतनाञ्जते ।
चत्वार श्रयणार्थाः स्युः पर्यास परिवृङ्क्ते च ।
परिवृक्तं परिवृज्यात्तथा परिवृणक्ति च ।
परिवर्जनकर्माणो श्रेषतेऽधिश्रयत्तथा ।
अपच्योऽष्ठा विवहीति चत्वारः प्रच्युति क्रियाः ।
५३० मरै मर्मर्तु मुमुरत्तथा मम्रुर्मरामहै ।
रूपाणि मरणार्थानि पृच्छा प्राट् प्रश्नमाहतुः ।
रणद्रणन्त ररण रणन्ते राणिषुस्तथा ।
ररन्धि रतिकर्माणो निर्वापय शमक्रियः ।
अध्येयानुक्रमध्येषा कृतोपनयनैर्द्विजैः ।
दाशतय्यर्थमिच्छद्भिः केशवाय नमो नमः ॥

आख्यातानुक्रमणी समाप्ता

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नामानुक्रमणी

ओं नमो वासुदेवाय नामधेयविनिर्णयः ।
वृद्धोपदेशादाख्याताद् विशेषणसमन्वयात् ।
स्वरतो ब्राह्मणादर्थाद् भूर्भूमिः क्षा क्षमादितिः ।
स्मावनिर्गौरिडा वज्रा ज्मा माता दुहिता क्षितिः ।
पृथिवीयं वर्धयन्ती पद्या पूषा रिषोर्जनी ।
वसर्हेडोर्वरा गोत्रा मीमोर्वी निऋतिर्मही ।
क्षोण्युरूची गातुरमः क्ष्मा श्रेष्ठा क्षेत्रफर्वरे ।
विशिष्टे सोदके पथ्या द्व्यम्बिका बृहती तथा ।
गोगोत्रे शाकलैर्हेये इति केचन वैदिकाः ।
१० धन्वः स्यान्निर्जले देशे लोगे लोष्टं भवेदिति ।
गृहा दुर्या दमो योनिः स्वसरं विदथस्तयः ।
क्षयो वरूथं वृजनं पस्त्या हम्यं गयः पदम् ।
दुरोणं वर्तनिः शर्म विष्टप् क्षमो निवेशनम्
पाथो ज्म वसतिर्वास्तु सद्मौको वर्त्म निष्कृतम् ।
पद्वीयं सदः केत ओक्यं छायास्तवर्त्मनी ।
अमा सधस्थं शरणं कक्ष्यं नीडं धरीमणि ।
पाजो रजः सधिः सानुः कृत्तिस्थानं छदिर्जगत् ।
जन्मस्थानं भवेन्नाभिराष्ट्रीया यत्र भुज्यते ।
काकम्बीराग्निधाने द्वे काकस्थानमहानसे ।
२० निम्नं गम्भं गम्भरं च दश प्रवणवाचकाः ।
देशे परं गुणयुते भवेदिरिणमूषरे ।
अध्वा गातुः पत्रिः पन्था वृजनं सूरयः सुतिः ।

---

१. '०स्य०' मुद्रिते ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रुदेम वर्त्म वयुनं गव्यूतिर्वह्मजंहसी ।
सीता भीता व्यथिः पथ्या पदान्यूतिः सुगायने ।
वर्त्म निःसरणं रीतिः पञ्चविंशतिरध्वनः ।
मध्ये यत्र दशोषित्वा गूढमग्निं दिवौकसः ।
अविन्दन्दशान्तरुष्यः सोऽत्रा कौषीतकोदितः ।
दूरं पराकं परममाकमारात्परावतः ।
अन्तः परं पराचैश्च नव दूरार्थवाचिनः ।
३० आसास्रापित्वेऽस्तमीके नेदीयः समयाम्बरम् ।
उपाकोपह्वरावाका अन्त्यर्वावत्प्रतिह्वरम् ।
तडित्समीकमवममन्तमोपमतुर्वशाः ।
अष्टादश समीपार्था वनारण्ये तथारणः ।
अरण्यानीति चत्वारि तत्र ज्ञानिर्जला इति ।
अद्रिरश्मा गिरिः सानुरघ्न्यहयतपर्वताः ।
ग्रावाणो हिमवान्नूर्वो दश पर्वतवाचकाः ।
तत्रैको मूजवान्नाम गुणवत्सोमसंभवः ।
वृक्षा वनानि तरवो वनिनो दुर्वनस्पतिः ।
वामोर्वेत्यष्ट वृक्षाणां नीलपुष्पोत सोमतः ।
४० शाखा स्कन्धो वया वल्शा लिभुजा तु तला मता ।
एध इध्मोऽरणिदारु गर्तस्त्वेधो मृतस्य यः ।
स्थूणामेतोपमित्स्तम्भो दण्डरम्भौ समाविति ।
रथो गर्तो जयुर्यामः सधस्थो रथवाचकाः ।
अनो वनस्पतिश्चैव शकटी च त्रयोऽनसः ।
चक्रश्चक्रिः पविर्नेमिः पृथक् चक्रस्य वाचकाः ।
पातल्यमा णिश्च समौ मात्रा शम्या निरुच्यते ।
समौ रथी सारथिश्च बंधुरः काष्ठसंहतिः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृक्षं वनस्पतिं चाहुः सप्तवाध्रिस्तु वेदिकाम् ।
स्वरुयूपौ समावाहुः सावने फलके चमूः ।
५० नौः पतत्री प्लवः पेरुर्नावा पञ्च समा मताः ।
प्रेङ्खो महाव्रतः प्रोक्त आघाभिर्दुन्दुभिः समौ ।
दर्व्यस्त्रिमपाणं तत्प्रसिद्धे युगलाङ्गले ।
विस्तारो जठलो नावां कूटश्च द्रुघणो घनः ।
चमसामत्रपात्राणि जुहूर्दर्व्युपसेचनी ।
स्रुग्घृताची प्रस्रवणो होमपात्राणि सस्रुवाः ।
वीणा वाणस्तथा क्षोणी क्षोणश्चैव समा इति ।
ग्रावाणः पर्वताः कृष्णा हरयो रुना हरिद्रवः ।
सूभर्वाद्रि सुकर्माणः सुपर्वसो नरो वृषाः ।
धिषणोपरसोमादः सुपर्णास्त्रिदिलास्तथा ।
६० भरित्रसानुवृषभा उस्ना मन्था मनीषिणाः ।
सोमिनश्चेति पयत्रा ग्रावाणः शाकलोदिताः ।
ओषध्यः शुरुधश्चन्द्रा मातरो बभ्रवस्तृणम् ।
सोम प्रस्वः पतत्रिण्यः शश्वतो जामयोऽग्रुवः ।
वीरुधो जरणाः सीराः केशिन्यो यवसं वपुः ।
पथ्या निष्कृतयो रायो हरिण्यो जगती तथा ।
उस्राश्चैवोपलाश्चैव समार्थाः पञ्चविंशतिः ।
छत्राकं चुम्पमित्याहुः तिल्विलः प्लक्षसन्निभः ।
क्षुद्रवृक्षोऽरण्यगतः प्ररोहे चातिमङ्गलः ।
सोमो हरिश्चित्रबर्हिः शुचिक्रन्दो वनस्पतिः ।
७० चम्रीपश्चमसो राजा विषुणोऽशुर्निचुम्पुणः ।
कण्वमान्महिषो मायी शुक्र विष्णुर्वृषानिधिः ।
पवमानोऽसुरो यज्ञो मदिरो मत्सरः क्रिविः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रप्सःपृक्षो मधुर्वेधा गौरन्धः सवनं मदः ।
मन्दी शुचिः सद्वयबर्हिरिन्दुर्मासो वषट्कृतः ।
जम्बारुपुञ्ज आदार आपो रातिः क्रतुः सुतः ।
ऋद्दूरो रसो भक्षः समुद्रः कलशस्तपुः ।
सवो ब्रह्म भेषजं च प्रसुवोऽभिवया अपि ।
अत्यश्च सप्तपञ्चाशदेते सोमस्य वाचकाः ।
कूपः कारोतरोः वन्त्र ऋश्यदः केवटोऽवतः ।
८० सूदः काटः क्रिविः कर्त दर्शतश्च तथा व्रजः ।
परिष्कृतिः खनित्रं वा उत्सः कूचश्च उत्सधिः ।
वेशतं चमसः श्वभ्रं कूश्च द्वाविंशतिर्मता ।
आहावश्चावपानं च निपातें तत्समीपजे ।
पूर्णः कूले भिन्नदेशः कुम्बलस्तूदरो मतः ।
रज्जुः सर्गो रश्मिपाशौ रशनाभीशुरेव च ।
दामाभिभानिघा बद्धो परत्राग्रन्थिधातवः ।
त्रयोदशैते नामानि रज्वाः स्युरिति शाकलाः ।
नद्यो रुजानाः सरितः सिन्धवोऽवनयो मिहः ।
एन्यः स्रवन्त्यः स्रवतः स्वादोअर्णा अभिष्टयः ।
९० हिरण्यवर्णाः प्रवतः सृत्वर्यो मातरोऽग्रुवः ।
वक्षणा व्राधता कुल्या रोधचक्रा असश्चतः ।
अद्रयो विसृतः पस्त्या सुम्वयो युवती मही ।
वर्तन्यो योषणा रीतिः स्वसारो धीतयः सिराः ।
सीता नाव्या ऋतावर्यो रोधस्वर्त्यस्तथा वयाः ।
व्यामयो वहतो यह्वयो वाश्रा रध्र्यश्च रेवतीः ।
वक्षण्य ऊर्मयः स्रोत्या ध्वनयश्चेति जागताः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मावो रसे मम्म इति तद्विशेषाद्[1]वृचोदिताः ।
विपाट् छिपाः सुवास्तुश्च गोमती श्वेतयावरी ।
अश्मन्वतीः सन्ति चान्यास्तत्र तत्र प्रदर्शिताः ।

१०० सरो ह्रदश्च सरसी नदः सिन्धुस्तथार्णवः ।
उदमेघः समुद्रोऽष्टौ सरसो वाचका इमे ।
जघनार्धे कुरुक्षेत्रे शर्यणावद्ध वै सरः ।
अस्तीति ताल्वकायुक्तं प्रसिद्धे फेनबुद्बुदे ।
तुग्वतीर्थे समे प्राहुः शीपालं शैवले भवेत् ।
उदकं पिप्पलं शापमापो गावोऽम्बयः स्वधा ।
अर्णो घृतं पशः शुब्धाः सलिलं विषमायुधम् ।
क्षोदः क्षीरं रजः काष्ठा अररिन्दरुजत्कुशः ।
ऋतं तमोऽच्युतं रेतः कबन्धं भोजनं मधुः ।
धरुणं गम्भरं द्रप्सः पुरीषं कं वनं वपुः ।

११० तूर्णाशममृतं पृश्निः सतीनमुद ऊर्मयः ।
अम्भः स्तर्यो रसो नाम बृबूकं शोचिरक्षितम् ।
द्रु समुद्रं बुसं तुम्याजनित्रं भुवनं नभः ।
वाताप्यं विष्पितं प्राथः कृपीटं हविरिच्चपः ।
जज्झतीः शुरुधो ज्योतिः स्वोऽक्षरं क्षाम रेवतीः ।
स्त्रिया जलाषं पीयूषं वोपा ब्रह्माप संशिवाः ।
स्रोतोऽभ्रियं शर्म जन्म शम्बरं भोजनं सहः ।
महदोजो महः क्षेम पवित्रं व्योमजामयः ।
स्वेदो गर्भोऽघ्न्या च धाम द्युम्नमुदं यशोमयिः ।
सिन्धवोऽवनयः सर्गा अभ्रं वामातरिश्वरीः ।

---

१. यथा मुद्रितं पाठः । 'ऋचो०' इति स्यात् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२० पृश्निगर्भा जीवधन्या वाण्यो नद्यो मिहस्तथा ।
अनुष्ठाः क्षद्वच मांश्चत्वमार्द्रं गर्भो वना तथा ।
धामधासिस्तथा प्रस्वो योनिश्चोदकवाचकाः ।
एकविंशच्छतं तेऽमी पठिताः शाकलैरिति ।
महत्तदुद्भवमित्येतदुदके पर्यवस्यति ।
अन्नं धासिः पितुः स्वाम स्वधा वाजः प्रयःसिनम् ।
इडिरा पचतं पृक्षश्चनो द्युम्नः पयोऽमृतम् ।
प्सरः ससः श्रवो राधः पित्वोध्नो भोजनं नमः ।
सनमात्मा विधिर्तेम क्षद्मपाथ इडोर्क् पयः ।
आन्त्राणि भक्षमन्नसं ब्रह्म पीवो यशो गिरः ।
१३० पाजोऽर्च प्लक्षकीलाल मायुरर्को रसः सुराः ।
शुरुधो यशसः पृश्निरसुतिर्गृ विषुस्तथा ।
चतुष्पञ्चाशतं प्राहुरन्नानामानि वैदिकाः ।
धनं मघं रयिः क्षत्रं वसु रिक्थं तनं यशः ।
धनिर्वादं भगश्चित्रं शेवधिर्भोजनं गयः ।
भुङ् मोडहं द्रविणं श्वात्रं विभत्रं सौभगं श्रवः ।
वेद्रो द्युम्नं वरं वार्यं मेधा हेमार्थमृनृते ।
जीवातुरिन्द्रियं ग्राभस्तरुत्रं वरिवो वृतम् ।
मेहना दक्षिणा दक्षो नान्द्यं भागभरीमणी ।
राधो बन्धुः सुम्नगोत्रे स्वर्नृम्णं रत्नरेक्णसो ।
१४० ... ... मन्मैधतुर्मतिः ।
जानोचथे तथामीष्टिर्दाश गातुः पनस्तरुः ।
वसत्याथ वस्त्यं च ... ... शिशपत्नु घने इति ।
विक्रीयमाणं वाणं स्याद्वाम देवेन भाषितम् ।
हिरण्यं कृशनं चन्द्रं रुक्षोऽयो हेमभर्मणी ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पेशोऽमृतं तथा निष्कं निष्के हारेऽपि ते दश ।
अलङ्करणवाचीनि शुभ्रेभिस्तृभिरञ्जिभिः ।
अलङ्कर्ता तु नो मत्यस्ततनुष्टिः स नास्तिकः ।
गाव उस्रो जगत्यो प्रा मह्योऽघ्न्याः पृश्नयः पुरः ।
उस्रिया श्रीरिडा गौरी विश्वाच्यो दक्षिणा इषः ।
१५० स्वर्योऽष्ठक्रण्यो रेवत्यो रायियः पशवोऽदितिः ।
धेनुः संशिश्वरी गृष्टिरुरुधारा रिधायसः ।
ऊर्जस्वत्यः पयस्वत्यः पीवस्वत्यो गव्यं विसद् ।
चित्तगर्भा जातगर्भा निवृत्तप्रसवा स्तरी ।
वत्सः शिशुर्वष्कयस्तु वत्सः स्यादेकहायनः ।
अध्यूर्धवर्षस्त्वविः स्याद्दध्रिर्मुष्के हते भवेत् ।
वृषो दधिर्मुष्कसारो वृषोक्षा भीमवंसगौ ।
उष्ट्रारो वृषभोऽनड्वान् प्रयोगो यस्तु दम्यते ।
रिरष्टोऽशक्त उत्सृष्टो वहनात्कर्षणादपि ।
पयःक्षीरं सवःपक्वं पीयूषममृतं परम् ।
१६० दुग्धं काम्यमृतं धायः साध्वन्धो रुशदाशिरः ।
शुष्कं स्यात्षोऽशं तेषामाज्यं सर्पिर्घृतं मधु ।
व्रजहं व्रक्षणोधश्च वाचक्रास्त्रय ऊधसः ।
स्तनः शशः समौ स्यातां शृङ्गकूटोपशास्तराः ।
त्वक् चर्म कृत्तिर्वृजनमविर्मेष उरावि कः ।
अजश्छागः शुगः पेत्वश्चाजकाव उरामथिः ।
सालावृकः सारमेयो विश्वयत्सरमा वृकः ।
सिंहो मृगस्तस्य ... ... ।
इभो हस्ती तथैवेभ्यः उष्ट्रगर्दभरासभाः ।
लोपाशः स्यात्कृष्णमृगः पतरुस्त्व ... कान्मृगः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१७० वराहसूकरमृगाः शशारूश्च .... ।।
कैतवः शुन्धवः पैद्वो हरितोर्वन्त आशवः ।।
किलास्यो व्यत्ययः पत्रं दधिक्रा वह्निवाघतौ ।।
पतत्रिणः पतङ्गाश्च ककुहासः प्रतूर्तयः ।।
मांश्चत्वो बभ्रवः श्रौष्टिः सप्तिः पृषतयो हरिः ।।
एतग्वा तरणिर्वाजी दधिक्रावा वयोजवः ।।
विप्रा गावोऽजिराः श्येनाः सर्गा रम्याश्च वक्षथाः ।।
पृषत्य एतशा नप्त्यः शुचिहासो रघुस्तथा ।
जागता न्यश्वनामानि रोहितोऽग्नेः प्रकीर्तितः ।
अरुण्यो गाव उषसां विश्वरूपा बृहस्पतेः ।

१८० हरी इन्द्रस्य हरितः सूर्यस्याश्वौ तु रासभौ ।
अश्विनोर्नियुतो वायोः पृषस्यो मरुतां तथा ।
पूष्णोऽज्ञाः सवितुः श्यावास्तेऽमी वैशेषिका दश ।
मांसं मा आमिषं क्रव्यं क्रविडामश्च षट् समाः ।।
शकृच्छकृस्तथा भासः शकृतो वाचकास्त्रयः ।।
अश्वाजनी कशा तोदः कशिका च तुजा समाः ।।
वस्त्रं वाससस्तना सानुर्निर्णिगल्कं तथा स्नु च ।।
वारेण्यमिति वस्त्राणि वाससोऽन्ते च सिग्भवेत् ।।
स्याद्वीयमानं विततं वाधूयं मन्त्रवाससि ।
पुत्रः सूनुर्यहुस्तोकः शेषोऽपत्यं नपात्प्रजाः ।।

१९० तुग्जातं जत्त्वो गर्भो यशो रेतो रयिस्तुजिः ।
तन्तुर्वीरो युवाजाश्वः कुमारस्तनयस्तनः ।
बह्मिजो यशसस्तान्यः पिशो मर्या वृषा शिशुः ।
दक्षो रावेतसुर्जायुः क्रीडिराण्ड कनीनकः ।
वाजी मीढ्वांस्तनूर्यांशुः शक्तितेजश्च रश्मयः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनिमा सूनरश्चापि पुत्रा एकोनजागताः ।
दुहिता विट् कनी कन्या प्रफर्वी मेनिकन्यके ।
शुन्ध्यू कनीनिकाथर्वी कुमारी युवतिस्तथा ।
दौहित्रो दुहितुर्नप्तिः पौत्रोऽपि तनयो नपात् ।
अगस्त्यस्य नद्भ इति स्वस्त्रीया नत ईरिताः ।
२०० स्त्रियो योषा योषणा ग्ना धेना मेना पुरन्धयः ।
नार्यो वपुष्यो रश्मिण्यो धीराः पत्न्यः कमद्युवः ।
अधर्यो जनयो जाया जामयोगर्भधीः पिशः ।
एषैषी महिषी केशी वेना युवतयो मतिः ।
अह्नो दिधिष्ण्वो यादुर्य उस्रात्रिर्भावयुश्चदः ।
सत्यश्च कुलपा शर्यास्त्रिशत्पञ्चाधिकाः स्त्रियः ।
विधवाविधुरे तुल्ये हस्ता स्त्री हाससंयुता ।
काममूर्ता वृषस्यन्ती विद्वला विदुषी समे ।
अनुचर्यनुदेयी स्यान्न्योचनी परिचारिणी ।
असपत्नी काव्यतिः स्यात्परिवृत्ता निराकृता ।
२१० अम्बका रोदसी पृश्निः पत्न्यो रुद्रस्य कीर्तिताः ।
शचीन्द्राणी च ऋतचित्पत्न्य इन्द्रस्य ता अपि ।
जननीन्द्रस्य निष्टिः श्री पज्रा चैवादितिस्तथा ।
उत ग्ना व्यन्तु या गुङ्गूर्देवपत्न्यः प्रदर्शिताः ।
माता जनित्री सूर्जन्म ननामापि च केचन ।
पिता तातश्च जनिता जन्मेति पितृवाचिनः ।
ऋषभः शृङ्गवृद्धीति पितेन्द्रस्य बभूव सः ।
जामिः स्वसा च पर्यायौ समे एव वधूस्नुषे ।
जामाता विट्पतिश्चैव वधूयुश्च तदीधितिः ।
जास्पतिश्च विजामाता भवेदश्रोत्रियो वरः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२२० भर्ता हना युवा चाकन्युवशः पतिरेव च ।
जीरो वीरः पूर्वहूतिर्वृषणो वृषभो वरः ।
धवश्च पत्युर्नामानि तानीमानि त्रयोदश ।
पत्युः स्वसा ननान्दा सा उभयोः श्वशुरः पिता ।
स्यालो भ्राता तु भार्यायाः भर्तुश्चेद्देवृदेवरौ ।
माता प्रियायाः श्वश्रूः स्यान्माता पत्युस्तथैव च ।
धीर्धिषा धिषणा केतुर्मतिर्विद्मः क्रतुः श्रवः ।
मेधा मन्युर्मनश्चेतः पुरन्धिर्वयुनं शची ।
चेतनं विदथं माया मन्तुहृत्केतचित्तयः ।
द्वाविंशति स्युः प्रज्ञाया आगूराकृतिरिष्यते ।
२३० बलमोजः शवः क्षत्रं वाजश्चौत्नं तपः सहः ।
पौंस्यं मज्म स्वधा नृम्णं तविषी शुष्ममिन्द्रियम् ।
शर्धो दक्षस्तरः शोचिः शक्तिः शूषममस्तयः ।
मानुषं तुपुषिः पुष्टं त्वक्षः पुरुषता तथा ।
अमुर्यं वृजिनं रक्षो वाजः सत्वमसुर्जनुः ।
शृध्या वेपो रयः पृक्षो वृषत्वं बन्धुयामनी ।
तुजाभ द्रविणं ब्रह्म तविषाश्वे अपस्तथा ।
असुरत्वं च पञ्चाशद्बलस्यैकाधिकं भवेत् ।
मनुष्याः कृष्टयो मर्त्या आयवः पूरवः प्रजाः ।
विशो मरो जना मर्या नहुषो मनवोऽनवः
२४० मर्ता व्राताश्चर्षणयो मानुषा जन्तवो मुरः ।
क्षोणयो जनिमान्यूमा जन्मानि भुवनानि च ।
केशिन्यः पुरुषा भूम चर्षणिर्वह्निमाहिनौ ।
क्षितिर्वः नायुर्वनुषो मनुषस्तुर्वशायवः ।
देह्यो मह्यः पुरः पस्त्या जातुः पत्युरया वसुः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋषुरेवा मनुष्याणां त्रिष्टुबेकाधिका भवेत् ।
पादः पत्पट् चरित्रं च जङ्घोरुः सक्थिपक्वरी ।
एनी प्लवं तस्यमूलं वटूरं गुल्फमिष्यते ।
शिश्नः शेफो वैतसश्च कपृद्धश्च मेहनः ।
अनस्थोरु प्रजननं सवो धूर्तस्तु निष्पपीः ।
२५० योनिर्भेदो भसत्सूम कंशोपस्थे च रोमशम् ।
उदरं जठरं कुक्षिर्हार्दिगर्भः समा इति ।
उरो वक्षश्च हृदयं हृच्चत्वार इमे समाः ।
बाहू भरित्रौ भुरिजौ करः स्ना किरणोऽङ्कुशम् ।
हस्तो विनं गृसः पाणी गभस्ती शक्वरी इति ।
बाह्वोरेकादशैतानि मूलमंसत्रयोरिति ।
अङ्गुल्यो योषणः शाखा वृशो नप्त्यः क्षिपो विपः ।
अण्व्योऽग्रुवो दीधितयो धितयो जामयो धुरः ।
अथर्योऽवनयः कक्ष्या स्वसारो रशनोस्रयः ।
शर्या योक्त्राणि हरितो हस्त्यभीशुगभस्तयः ।
२६० क्षपाश्चाङ्गुलिनामानि षड्विंशतिरिमानि नः ।
ग्रीवा ग्रयः शिरो मूर्धा शीर्षोखे शिम्बलं तथा ।
कर्णः श्रोत्रं हनू शिप्रे स्यातां ते अधरोत्तरे ।
चक्षुश्चक्षोऽक्षि दृक् चक्षुर्दृङ् मुखमासास्याननाः ।
वाक् शुक्तिरिति नामानि सप्तास्यस्य प्रचक्षते ।
द्रंष्ट्रे जम्भे च तीक्ष्णाग्रौ दन्तौ पार्श्वगतौ मतौ ।
जिह्वा धना काकुदं च जिह्वाया वाचकास्त्रयः ।
शिप्रे हनू नासिके वा तथा यास्कोऽब्रवीदिति ।
शिरस्त्राणेऽपि शिप्रा स्यात् कपर्दस्तु शिखा मता ।
मांसं शिरस्यं मस्तिष्कं केशाः स्युर्मूर्धजा इति ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२७० रोमलोम तान्वमण्व्यः केशसङ्घस्तु कः स्मृतः ।
शरीरमात्मा देहश्च दमो धाम तनुर्जुसुः ।
जरायुर्ब्रह्मवपुषी मानं गात्रं च नाम च ।
त्वक् पृष्ठं गेयमेतानि देहनामानि षोडश ।
जीर्णो जुजुर्वाञ्जहितस्तवीयाञ्जिव्रिराशितः ।
वृधो ज्ञश्चे तवांश्चेति नव वृद्धस्य वाचकाः ।
श्रोणो विभग्नजानुः स्याच्छयावः कुष्ठेन दूषितः ।
जरणा पलितो वव्रिर्ज्जरा यक्ष्म गदो रपः ।
स्रामोऽमीवा रजो रोगो विशंसो द्वादशो भवेत् ।
अश्लीलस्तु कृशाङ्गः स्यात्सुप्रतीकस्तु शोभनः ।
२८० मनीषिणो विपो विप्रा गृत्सा विप्रा विपश्चितः ।
कवयो मेधिरा धीरा वेनाः कण्वा नवेदसः ।
आकेनिपा विधातारो मतयोऽद्वयतयोऽसुराः ।
केनिपा मतुथाः क्रीस्ताः प्रज्ञातारः प्रचेतसः ।
चिकित्वन्मनसोऽमूरा वेविदानाः पुरन्धयः ।
ऋभुर्विद्वानुशिक् सूरिश्चिकित्वान् स्पट् कविक्रतुः ।
बोधिन्मना मन्वपाको बोहब्रह्मासिमाघवौ ।
जानन्मनोता दीर्घश्रुन्मन्तुमान्मन्तवस्तथा ।
वचोविदश्च प्रज्ञाः स्युः पङ्क्तिः पञ्चाविका इति ।
अविद्वानन्धबधिरौ पाकमूकावचेतसः ।
२९० स्तोतारः कारवो रेफा जरिता स्तोमवाहसः ।
सूरयः कीरयो रुद्रा मरुतो वृषभा नराः ।
ब्रह्मणो वसवो वाका हडो ब्रह्मकृतो मखाः ।
पादाः कण्वास ऋभवो जोगुवो मुनयः स्तुभः ।
वन्दारुः स्वरणः स्तोमो वृषा वह्निररिस्तुरः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोमोवतो विप्रवचा गिरोऽनावाश्च वेधसः ।
स्वेदो विभावसुर्गृध्रो मध्वक्तौ सन् विचक्षणः ।
अरंकृच्छशमानोऽद्रिमना स्तामुविमन्यवः ।
सरवा जरन्नृषिः स्तुभ्वा वन्धुक्षिद्वृषमान्यवः ।
उक्थशा उक्थवाहाशा देवो भन्दिष्ठमन्दयू ।
३०० जोगुवानः सुश्रवसो वृधः सुभ्वा नमस्विनः ।
आप्रशुष्टिः पूर्वहूतिर्गाधिनो रघुमण्यवः ।
मनी गूर्तिर्मेदिनश्च नदनुः सूक्तवागिषः ।
स्तौनः श्वान्तः प्रमन्दो दङ्गाथिता मतयो जुरः ।
ब्रह्मप्रियो गूर्तवचाः शंसो लोघो मदो मृगः ।
वचस्यवो धियो यज्ञ आङ्गूषा जूर्णिनोघसौ ।
मेधाःकृपाण उक्षाणः कामकातीः शुभा इति ।
स्तोतृनामान्येकशतं शाकलाः संप्रचक्षते ।
वाङ्निवित्तन्यतुर्गौरी स्वनो मन्द्रा जनी रपाः ।
गान्धार्वी सूनृता धेना वाणीची भारती स्वरः ।
३१० पावीरवी रवो वग्नुर्घोषः क्रन्दा इडा श्रुतिः ।
हस्कारो वाग्वनुर्गाथा प्रोथथो गौरभिष्टनः ।
मायुः स्वाहा चोण्युपब्दिर्जिह्वा नाडी प्रयुक्तुपः ।
मन्द्रानुष्टुप् कावकन्ये वक्वा वाणी पवित्रस्तथा ।
वद्या विपथ्या रवथो वामा वाक् त्रिष्टुबेकयुक् ।
स्तुतिर्ब्रह्म हवो मन्त्र उक्थं स्तोमो मतिः कथा ।
धीर्मन्यवाहः ककुहा शोकः काव्यं नमो वचः ।
प्रैष आङ्गूष आवृत्तिः कातिर्योनिर्जरामृतम् ।
स्तुन्मनीषोचथं धीतिर्होत्रा राधस्तुतो वनुः ।
हवीम धिषणा योग्या नीथयोजनगातवः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३२० अक्षराशंसवहसी सूक्तमृङ्ग्यादनं दुवः ।
प्रयः पुरोहितिर्मन्तुर्वरूथं सक्ष्मवर्धनम् ।
द्यौः कीर्तिस्तवथ प्रैषो वाक्कार्या सूनृता कथा ।
शस्तिर्धनं शूषशासी मायाशीः साम धाम च ।
प्रयुजोऽवो निवचनं श्रोत्राकौं श्रौषडेव च ।
ऋतगायत्रमनना वन्दनं भन्दना तथा ।
प्रभृतिः सुमतिश्चैव पक्त्वा ब्रह्मकृतिस्तथा ।
अशीतिः स्तुतिनामानि मदस्तत्र निविद्भवेत् ।
ऋत्विजो ग्रावहस्तासो भरता वृक्तबर्हिषः ।
जुह्वः सबाधो होतारो देवा देवयवोऽसुराः ।
३३० वाघतः कारवः पस्त्याः सोममादो यतस्रुचः ।
उक्षा सरवाध्वरीयन्तो धीरणा संयतोऽपसः ।
सुहस्त्य ऊर्ध्वग्रावाणो युक्तग्रावा नरोह्रयः ।
हविष्मन्तस्तथाः पृक्षाः काकुभा ऋत्विजो मताः ।
हविर्हव्यं विश्वमिन्वं मधु यज्ञस्तनामृते ।
हविष्कृतिरपो मेधो मयो द्युम्नमृणं गृभः ।
स्वाहापूपपुरोडाशौ मन्धकं सुशमीति च ।
एकविंशः करम्भ स्याद्धविषो वाचकेष्विति ।
यजमाना विवस्वन्तो दाश्वांसः सद्मबर्हिषः ।
सुतावन्तो हविष्मन्तो हव्यदातिरनुव्रतः ।
३४० यज्वानो यज्यवो यज्ञा वीतिहोत्राः सपर्यवः ।
सोमानः सोमिनः सोम्याः सुकृत्सावो हविष्पति ।
मघवानो निक्तहस्ता दामा दाश्वांश्च दाशुरिः ।
रातहव्या विहुत्मत्यो हताः सुष्टिधियाजुरः ।
दीर्घप्रयज्युर्घातार अर्यो यज्ञियसोमपाः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधन्तो यज्ञवनस आर्याः क्राणाश्च निःसृजः ।
इयक्षमाणो बर्हिष्मानृतावाश्वत्थसुम्नयू ।
हव्यवाड्वनिनः स्वाधीरुद्यतस्रुग्घियायवः ।
दीर्घाधियः पाकसुत्वा शिमीवानद्भुतो मखः ।
यज्ञसाचो रयिवृधो दाशाः प्राचुश्च सुक्षितिः ।
३५० वृधाः सहस्रनीथाश्च हविर्दा धीरणास्तथा ।
दाश्वध्वर ऋजूयाश्च हविष्कृद्वृषभा हवः ।
ओटयदेवो वसुधियः सुप्रावीर्देवयुस्तथा ।
त्रिसप्ततिः स्युस्त इमे यजमानस्य वाचकाः ।
कर्मविष्ट्वी दिवश्चित्त्रिह्म वीयं क्रतुर्व्रतः ।
अद्भुतं चरितं कर्त्वं दंसना सुवितं करः ।
कूटः सुकृत्या करणं केरुर्वायोद्यतं शची ।
अप्नोवश्चकृतं सत्यं नीतिरूतिर्महं शमी ।
उपेतिरत्वग्धि शग्म कावं जातमपः शिमी ।
कर्वरं करणं वेपः शिल्पापत्ये क्रतुर्यकम् ।
३६० धर्मवर्पो नाम पङ्क्तिः कर्मणः सप्तचाधिकाः ।
यज्ञः सवोऽध्वरो बर्हिः सवनं यजथो यजुः ।
ऋतं मघो देवतातिरिष्टिर्होत्रं महद्दमम् ।
मेधसातिर्हव्यजुष्टिः स्वर्णरो विष्णुकर्मणी ।
पङ्क्तिराधा देववीतिर्मियेधो माहिनं क्षयम् ।
वेदिर्निषदनं हर्म्यं क्रतुर्वक्षो हवीम च ।
सहस्रवल्शः संहोत्रः शेवारः परिधिर्हविः ।
त्रिषधस्थो देवयज्या सोतुवीतिर्दिविष्टयः ।
